# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – पौरोहित्यम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – याज्ञिकन्यायमाला | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ याज्ञिकं जन्म सोमीयं किं वान्यदिति चिन्त्यताम् ।
वेदैस्त्रिभिः कृतो यज्ञ इति दीक्षैव याज्ञिकम् ॥

२ संस्काराणां बहूनां चेत् तन्त्रानुष्ठानमिष्यते ।
तत्र सर्वोपकारीणि चाङ्गानि सकृदेव हि ॥

३ नान्दीश्राद्धं यत्र नैव तत्र षोडशमातरः ।
पूज्या न वेति सन्देहे श्राद्धाङ्गत्वान्न पूजनम् ॥

**प्रश्नः २** **तान्त्रिकमन्त्रेषु प्रणवायोजनाधिकरणं यथाशास्त्रं विवेच्यताम् ।**

**प्रश्नः ३** **वैणवदण्डे मानाभावाधिकरणं वर्णयत ।**

**प्रश्नः ४** **कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ किं वैष्ववादियज्ञेषु गायत्रीपूजनादिषु ।
पौराणाः स्वकृताः श्लोका योज्या नैवेति संशये ॥

२ उपचारेषु ताम्बूलं साधितं वास्त्यसाधितम् ।
साधितं भोग्यतापन्नं देयं देवाय नेतरत् ॥

३ मसूर शुक्ति जम्बीरा इत्याद्या आमिषे मताः ।
मांस प्रसिद्धं मत्स्यादि चाण्डमामिषमेव हि ॥

**प्रश्नः ५** **हविष्यत्वव्यवस्थापनाधिकरणं यथाशास्त्रं विवेच्यताम् ।**

**प्रश्नः ६** **फलपुष्पसमर्पणविधानं वर्णयत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ तन्वा त्यक्तस्य जीवस्य क्षुत्पिपासादिनाशनम् ।
श्राद्धं दृष्टफलं यद् वा दृष्टादृष्टफलं भवेत् ॥

२ गयाश्राद्धोत्तरं श्राद्धं पिण्डं ब्राह्मणभोजनम् ।
न कर्तव्यं विधेयं वा माहात्म्येऽकरणीयता ॥

३ शब्दात्मिका देववेति वैधं कर्म फलप्रदम् ।
किमयं पूर्वमीमांसासिद्धान्तः श्रुतिमूलकः ॥

**प्रश्नः ८ मुक्तस्य श्राद्धकर्तव्यविषये ग्रन्थोक्तदिशा वर्णनं कुरुत ।**

**प्रश्नः ९ याज्ञिकेषु देवताविग्रहाधिकरणं वर्णयत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ पञ्चमाध्यायस्य नाम किम् ?
२ मखः कतिविधः ? के चे ते ?
३ नान्दीश्राद्धात् पूर्वं कासां पूजनं भवति ?
४ नामकरणं कः करोति ?
५ अलङ्करणे कस्य ग्रहणं भवति ?
६ कति वसोर्धाराः पूज्याः ?
७ किं नाम हविष्यम् ?
८ आमिषं नाम किम् ?
९ के इक्षुविकाराः ?
१० सप्तमाध्यायस्य नाम किम् ?
११ गयायां श्राद्धेन पितॄणां कुत्र वासो भवति ?
१२ सप्तमाध्याये कति श्लोकाः सन्ति ?
१३ गयायां पिण्डदानेन कति कुलानाम् उद्धारो भवति ?
१४ दण्डग्रहणमात्रेण नरः किं भवेत् ?
१५ ‘याज्ञिकन्यायमाला’ इति ग्रन्थस्य कर्ता कः ?

****